सर्वाण्यपि रूपाणि भौवादिकगर्जतिवत् (422) ज्ञेयानि । [1]लोकम्पृणः ।

## (1053) "पृथ प्रक्षेपे" (X-चुरादिः-1554. सक. सेट्. उभ.)

'पृथेः पर्थयतीत्येतत् प्रक्षेपे णौ पदं विदुः ॥' (श्लो.99) इति देवः ।

पर्थकः-र्थिका, पिपर्थयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककल्पयतिवत् (250) ज्ञेयानि । ल्त्वादिकं नास्येति विशेषः । [A]पर्थितः ।

## (1054) "पृषु सेचने" (I-भ्वादिः-705. सक. सेट्. पर.)

'—हिंसासंक्लेशनयोश्च' इति माधवः ।

पर्षकः-र्षिका, पर्षकः-र्षिका, पिपर्षिषकः-षिका, [2]परीपृषकः-षिका ;
पर्षिता-त्री, पर्षयिता-त्री, पिपर्षिषिता-त्री, परीपृषिता-त्री ;
पर्षन्-[3]व्यतिपर्षन्-न्ती, पर्षयन्-न्ती, पिपर्षिषन्-न्ती ; —
— पर्षयमाणः, — परीपृष्यमाणः ;
— पर्षयिष्यमाणः, — परीपृषिष्यमाणः ;
पृट्-पृड्-पृषौ-पृषः ; — — —
[4]पृष्टम्-पृष्टः-पृष्टवान्, पर्षितः, पिपर्षिषितः, परीपृषितः-तवान् ;
पर्षः, [5]पर्षणः, सुपर्षी, पर्षः, पिपर्षिषुः, परीपर्षः ;
पर्षितव्यम्, पर्षयितव्यम्, पिपर्षिषितव्यम्, परीपृषितव्यम् ;
पर्षणीयम्, पर्षणीयम्, पिपर्षिषणीयम्, परीपृषणीयम् ;

---

1. लोकं पृणतीति लोकम्पृणः । 'कप्रकरणे-मूलविभुजादिभ्य उपसंख्यानम्' (वा. 3-2-5) इति कर्तरि कप्रत्यये, 'लोकस्य पृणे' (वा. 6-3-70) इति मुमागमः । लोकम्पृणः=यागवेदिका, आशुकार्यकारी, जनरञ्जकश्च ।
2. यङन्ते सर्वत्र, 'रीग् ऋदुपधस्य च' (7-4-90) इति रीगागमः ।
3. 'न गतिहिंसार्थेभ्यः' (1-3-15) इति कर्मव्यतीहारे शानजिनषेधात् शतैव ।
4. उदित्त्वेन क्त्वायामिड्विकल्पनात्, निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्निषेधः । ष्टुत्वम् ।
5. नन्द्यादित्वेन (3-1-134) कर्तरि ल्युप्रत्ययः ।

A. 'अप्रार्थितो व्रजगृहेऽपि च पर्थितोऽभूदासम्बयन् जनमतिं निजशाम्बरीभिः ॥' धा. का. 3.15.